# Ekadashamukha Hanumatkavacham

# એકાદશમુખહનુમત્કવચમ્

## Document Information

Text title : ekAdashamukhahanumatkavacham

File name : ekaadashamukha.itx

Category : kavacha, hanumaana, agastya

Location : doc_hanumaana

Author : agasti

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : agastya_sa.nhitAyAmekAdashamukha

Latest update : August 14, 2004, February 5, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2023

*sanskritdocuments.org*

# એકાદશમુખહનુમત્કવચમ્

શ્રીગણેશાય નમઃ ।
લોપામુદ્રા ઉવાચ ।
કુમ્ભોદ્ભવ દયાસિન્ધો શ્રુતં હનુમતઃ પરમ્ ।
યન્ત્રમન્ત્રાદિકં સર્વં ત્વન્મુખોદીરિતં મયા ॥ ૧॥

દયાં કુરુ મયિ પ્રાણનાથ વેદિતુમુત્સહે ।
કવચં વાયુપુત્રસ્ય એકાદશમુખાત્મનઃ ॥ ૨॥

ઇત્યેવં વચનં શ્રુત્વા પ્રિયાયાઃ પ્રશ્રયાન્વિતમ્ ।
વક્તું પ્રચક્રમે તત્ર લોપામુદ્રાં પ્રતિ પ્રભુઃ ॥ ૩॥

અગસ્ત્ય ઉવાચ ।
નમસ્કૃત્વા રામદૂતાં હનુમન્તં મહામતિમ્ ।
બ્રહ્મપ્રોક્તં તુ કવચં શૃણુ સુન્દરિ સાદરમ્ ॥ ૪॥

સનન્દનાય સુમહચ્ચતુરાનનભાષિતમ્ ।
કવચં કામદં દિવ્યં રક્ષઃકુલનિબર્હણમ્ ॥ ૫॥

સર્વસમ્પત્પ્રદં પુણ્યં મર્ત્યાનાં મધુરસ્વરે ।
ૐ અસ્ય શ્રીકવચસ્યૈકાદશવક્ત્રસ્ય ધીમતઃ ॥ ૬॥

હનુમત્સ્તુતિમન્ત્રસ્ય સનન્દન ઋષિઃ સ્મૃતઃ ।
પ્રસન્નાત્મા હનૂમાંશ્ચ દેવતા પરિકીર્તિતા ॥ ૭॥

છન્દોઽનુષ્ટુપ્ સમાખ્યાતં બીજં વાયુસુતસ્તથા ।
મુખ્યઃ પ્રાણઃ શક્તિરિતિ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૮॥

સર્વકામાર્થસિદ્ધ્યર્થં જપ એવમુદીરયેત્ ।
ૐ સ્ફ્રેં-બીજં શક્તિધૃક્ પાતુ શિરો મે પવનાત્મજઃ ॥ ૯॥

ક્રૌં-બીજાત્મા નયનયોઃ પાતુ માં વાનરેશ્વરઃ ।

ક્ષં-બીજરૂપઃ કર્ણૌ મે સીતાશોકવિનાશનઃ ॥ ૧૦॥

ગ્લૌં-બીજવાચ્યો નાસાં મે લક્ષ્મણપ્રાણદાયકઃ ।
વં-બીજાર્થશ્ચ કણ્ઠં મે પાતુ ચાક્ષયકારકઃ ॥ ૧૧॥

ઐં-બીજવાચ્યો હૃદયં પાતુ મે કપિનાયકઃ ।
વં-બીજકીર્તિતઃ પાતુ બાહૂ મે ચાઞ્જનીસુતઃ ॥ ૧૨॥

હ્રાં-બીજો રાક્ષસેન્દ્રસ્ય દર્પહા પાતુ ચોદરમ્ ।
હ્રસૌં-બીજમયો મધ્યં પાતુ લઙ્કાવિદાહકઃ ॥ ૧૩॥

હ્રીં-બીજધરઃ પાતુ ગુહ્યં દેવેન્દ્રવન્દિતઃ ।
રં-બીજાત્મા સદા પાતુ ચોરૂ વાર્ધિલંઘનઃ ॥ ૧૪॥

સુગ્રીવસચિવઃ પાતુ જાનુની મે મનોજવઃ ।
પાદૌ પાદતલે પાતુ દ્રોણાચલધરો હરિઃ ॥ ૧૫॥

આપાદમસ્તકં પાતુ રામદૂતો મહાબલઃ ।
પૂર્વે વાનરવક્ત્રો મામાગ્નેય્યાં ક્ષત્રિયાન્તકૃત્ ॥ ૧૬॥

દક્ષિણે નારસિંહસ્તુ નૈરૃત્યાં ગણનાયકઃ ।
વારુણ્યાં દિશિ મામવ્યાત્ખગવક્ત્રો હરીશ્વરઃ ॥ ૧૭॥

વાયવ્યાં ભૈરવમુખઃ કૌબેર્યાં પાતુ માં સદા ।
ક્રોડાસ્યઃ પાતુ માં નિત્યમૈશાન્યાં રુદ્રરૂપધૃક્ ॥ ૧૮॥

ઊર્ધ્વં હયાનનઃ પાતુ ગુહ્યાધઃ સુમુખસ્તથા ।
રામાસ્યઃ પાતુ સર્વત્ર સૌમ્યરૂપો મહાભુજઃ ॥ ૧૯॥

ઇત્યેવં રામદૂતસ્ય કવચં યઃ પઠેત્સદા ।
એકાદશમુખસ્યૈતદ્ગોપ્યં વૈ કીર્તિતં મયા ॥ ૨૦॥

રક્ષોઘ્નં કામદં સૌમ્યં સર્વસમ્પદ્વિધાયકમ્ ।
પુત્રદં ધનદં ચોગ્રશત્રુસંઘવિમર્દનમ્ ॥ ૨૧॥

સ્વર્ગાપવર્ગદં દિવ્યં ચિન્તિતાર્થપ્રદં શુભમ્ ।
એતત્કવચમજ્ઞાત્વા મન્ત્રસિદ્ધિર્ન જાયતે ॥ ૨૨॥

ચત્વારિંશત્સહસ્રાણિ પઠેચ્છુદ્ધાત્મકો નરઃ ।
એકવારં પઠેન્નિત્યં કવચં સિદ્ધિદં પુમાન્ ॥ ૨૩॥

દ્વિવારં વા ત્રિવારં વા પઠન્નાયુષ્યમાપ્નુયાત્ ।
ક્રમાદેકાદશાદેવમાવર્તનજપાત્સુધીઃ ॥ ૨૪॥

વર્ષાન્તે દર્શનં સાક્ષાલ્લભતે નાત્ર સંશયઃ ।
યં યં ચિન્તયતે ચાર્થં તં તં પ્રાપ્નોતિ પૂરુષઃ ॥ ૨૫॥

બ્રહ્મોદીરિતમેતદ્ધિ તવાગ્રે કથિતં મહત્ ॥ ૨૬॥

ઇત્યેવમુક્ત્વા વચનં મહર્ષિસ્તૂષ્ણીં બભૂવેન્દુમુખીં નિરીક્ષ્ય ।
સંહૃષ્ટચિત્તાપિ તદા તદીયપાદૌ નનામાતિમુદા સ્વભર્તુઃ ॥ ૨૭॥

॥ ઇત્યગસ્ત્યસારસંહિતાયામેકાદશમુખહનુમત્કવચં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com
and PSA Easwaran

*Ekadashamukha Hanumatkavacham*
pdf was typeset on March 5, 2023

Please send corrections to *sanskrit@cheerful.com*